শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীনরসিংহাচার্যস্বামী ৱিরচিতম্

# ॥ শ্রীতোযাদ্রিরঙ্গনাথমঙ্গলাশাসনম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীতোযাদ্রিরঙ্গনাথমঙ্গলাশাসনম্ ॥

শ্রীভূমিনাযিকাচিত্তপদ্মসমাধিৱাসিনে।
জলশৈলনিৱাসায রঙ্গনাথায মঙ্গলম্॥ **1** ॥

সৰ্ৱাগমৈকসেৰ্ৱ্যায ভৰ্ৱ্যায পরমাত্মনে।
তোযশৈলনিৱাসায রঙ্গানাথায মঙ্গলম্॥ **2** ॥

কৃপাসিন্ধুসমুদ্ভূতপঙ্কজাযতচক্ষুষে।
রঙ্গ ! তে মঙ্গলং ভূযাৎ লক্ষ্মীলক্ষিতৱক্ষসে॥ **3** ॥

তাপত্রযনিমগ্নানাং ভুগ্নানাং ভৱভারতঃ।
রক্ষণে দীক্ষিতাযাস্তু রঙ্গনাথায মঙ্গলম্॥ **4** ॥

মঙ্গলম্ লোকনাথায মঙ্গলম্ পরমাত্মনে।
মঙ্গলং শ্রুতিগম্যায মঙ্গলং রঙ্গনাথ তে॥ **5** ॥

অশেষদুঃখসংহর্ত্রে ভর্ত্রে কর্ত্রে চ শশ্ৱতে।
মঙ্গলং রঙ্গনাথায জগন্মঙ্গলমূর্তযে॥ **6** ॥

শেষভোগীন্দ্রসংশ্লিষ্টচন্দনদ্রুমরূপিণে।
মঙ্গলং সৰ্ৱগন্ধায রঙ্গনাথায শেষিণে॥ **7** ॥

যোগনিদ্রাভিরামাভ্যাং নেত্রাভ্যাং জগতাং সদা।
সংমোহনায নাথায রঙ্গনাথায মঙ্গলম্॥ **8** ॥

শ্রীমন্নারাযণাভিখ্যমুনিমানসৱাসিনে।
তোযশৈলনিৱাসায রঙ্গনাথায মঙ্গলম্॥ **9** ॥

শ্রীৱৎসগোত্রসঞ্জাতনৃসিংহাচার্যরক্ষিণে।
শ্রীতোযশৈলনাথায রঙ্গনাথায মঙ্গলম্॥ **10** ॥

মঙ্গলাশাসনপরৈঃ মদাচার্যপুরোগমৈঃ।
সর্ৱৈশ্চ পূর্ৱৈরাচার্যৈঃ সৎকৃতাযাস্তু মঙ্গলম্॥ **11** ॥

॥ ইতি শ্রীতোযাদ্রিরঙ্গনাথমঙ্গলাশাসনং সমাপ্তম্॥